जनवरी २०१८

पौष शु० चतुर्दशी तः माघ शु० पूर्णिमा पर्यन्तम्, वै. २०७४

ISSN: 2347-1565

मूल्यम् : २५ रूप्यकाणि

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम् ५ अङ्कः ६



सम्पादकः
डॉ० जीतराम भट्टः
सचिवः

ISSN : 2347-1565 मूल्यम् ₹ २५/- रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

वर्षम्-५ जनवरी २०१८ अङ्कः-६

(पौष शु० चतुर्दशी तः माघ शु० पूर्णिमा पर्यन्तम्, वै. २०७४)

सम्पादकः

**डॉ0 जीतराम भट्टः**

सचिवः

सहायक सम्पादकः

**प्रद्युम्नचन्द्रः**

## दिल्ली संस्कृत अकादमी

(राष्ट्रिय-राजधानी-क्षेत्रम्, दिल्लीसर्वकारः)

**DELHI SANSKRIT ACADEMY**

**(GOVT. OF N.C.T., DELHI)**

**प्रकाशकः**

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५

दूरभाषः - ०११-२३६३५५९२, २३६३७७९८

## सदस्यताशुल्कम्

| | | |
|---|---|---|
| प्रति-अङ्कम् | : | 25 रूप्यकाणि, $2.5 |
| वार्षिकम् | : | 250 रूप्यकाणि, $25.00 |

ISSN : 2347-1565

© दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

© Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन (**दिल्लीसंस्कृतअकादमीपक्षे**)

Mode of payment:

Demand Draft, Money order or by CTC Cheque

( In favour of Delhi Sanskrit Academy)

E-mail Id : delhisanskritacademy@gmail.com

Website : www.sanskritacademy.delhi.gov.in

मुद्रकः

**एस.डी.एम. प्रिन्टर एण्ड पैकर**

हरिनगरम्, नव देहली-110064

मो. : 9811229529

# सम्पादकीयम्

संस्कृतसमाराधनाय तत्परास्तत्र भवन्तो भवत्यश्च जानन्त्येव यद् बाला: यदि संस्कृतं पठेयुस्तर्ह्येव संस्कृतभाषिणां जनानां संख्यायां वृद्धिर्भविष्यति, यतोऽद्यतनीया: बाला: श्वस्तना: नागरिका: सन्ति। एत एव बाला: भविष्यति काले विविधेषु क्षेत्रेषु कार्यरता: भविष्यन्ति। तत्र तदा संस्कृतस्य संरक्षणं संवर्धनञ्च करिष्यन्ति, किन्तु बालानां कृते तादृक् साहित्यस्य रचना भवेत् येन ते संस्कृतपठनाय प्रवृत्ता: भवेयु:। विडम्बनेयं यत्प्राय: बालान्नालक्ष्य संस्कृते न्यूनमेव लेखनं भवति। यथाऽन्यासु भाषासु बालानां कृते शिक्षणाय बालगीतानां बालकथानाञ्च रचना भवति तथैव संस्कृतेऽपि भवेत्। पञ्चतन्त्रे चोक्तं 'कथाच्छलेन बालानां नीतिस्तदिह कथ्यते।' बालप्रवृत्तिमनुसृत्य लघुकथाभि: बालकविताभिश्च संस्कृतं पठनाय प्रवृत्तिर्जागरणीया। सन्दर्भेऽस्मिन्नकादम्या संस्कृतबालपत्रिका 'संस्कृतचन्द्रिका' प्रकाश्यमाना विद्यते। संस्कृतसेविन: प्रार्थ्यन्ते यत्ते स्वकीयै: सारस्वतप्रयासै: बालेषु संस्कृतस्य प्रसारं कुर्यु:।

**सुमनसां प्रतिभाप्रतिभासिका**
**क्षितितलात्तमसश्च विनाशिका।**
**शिशुकिशोरयुवप्रियसाधिका**
**विजयते भुवि संस्कृत-चन्द्रिका॥**

**निवेदक:**
**डॉ. जीतरामभट्ट:**
**सचिव:**

## अनुक्रमणिका 'संस्कृत चन्द्रिका'-५/६


क्र.सं. पृ.सं.

सम्पादकीयम्

डॉ0 जीतराम भट्ट :

१. स्वाधीनराष्ट्रं प्रचुरं चकास्ते, मदीयदेशो विविधं विभाति..........१

-डॉ० रामेश्वरदत्त: शर्मा

२. सुकन्या..........३

-डॉ रामकिशोर मिश्र:

३. कुरु योगम्..........४

- ओम प्रकाश ठाकुर:

४. सत्सङ्गतिः किं न करोति पुंसाम्..........६

-डॉ० लता विग:

५. संस्कृतगीतम्..........८

-प्रीति सिंह:

६. बुभुक्षितः काकः..........१०

- डॉ० हर्षदेवमाधव:

७. अग्नि, धनुः..........१४

-डॉ० गदाधर: त्रिपाठी

८. चरैवेति-चरैवेति..........१६

-शुकदेव: शर्मा

९. आचार्यजयन्ती..........१७

-श्री प्रशांत वर्मन्

१०. कौशल-प्राप्तिः..........१९

-अंजु बाला

११. संस्कृतमहात्म्यम्..........२०

-हरीशचन्द्रकुकरेती

# "स्वाधीनराष्ट्रं प्रचुरं चकास्ते, मदीयदेशो विविधं विभाति"

-डॉ० रामेश्वरदत्तः शर्मा

यथा प्रसूनै विविधैश्च मालाः
विभिन्न वेशैः कमनीयकान्ता।
अनेकभेदैर्विविधस्वरूपैः
तथैव देशोऽयमतीव भाति।।1।।
कामं हि ते भिन्नमतावलम्बाः, विचित्रचिह्नानि च धारयन्ति।
उपासनामेत्य पृथक् चरन्ति, स्वराष्ट्ररक्षार्थमिहैकधर्माः।।2।।
बलिष्ठदेहाः कृषका युवान उद्योगकर्माश्रितनैकलोकाः।
धनैश्च धान्यैर्विविधप्रकारैः स्वदेशमेते शिखरं नयन्ति।।3।।
सर्वाङ्गसौन्दर्यसुदीप्तदेहाः मदोत्कटा वामविलोचनास्ताः
विशालवक्षःस्थल चित्तचौरा देशं यूनां मनांसि प्रसभं हरन्ति।।4।।
धनैर्हि धान्यैरतुलैर्बलैश्च, संसाधनैर्जीवनभोगयोग्यैः।
देशेषु देशोऽयमतीव भाति, यथा सुमेरुर्गिरिषु प्रशस्तः।।5।।
उच्चावचाचारविचारशीलैः, विभिन्नधर्माश्रितभिन्नकृत्यैः।
विभिन्नपुष्पैर्ग्रथितेवमाला वैविध्यमाप्तो धारयन्ति।
साहित्यसङ्गीतकलाप्रवीणाः, धुरन्धराः सर्वाविधासु दक्षाः।
वैलक्ष्यवैदुष्यमहार्हयोगैः, प्रख्यापयन्तीह गुरुं जगत्याः ।।6।।
शस्त्रास्त्रभण्डारविशालपूर्णम्, अजेयसैन्यं हतशत्रुदर्पम्।
विभेद्य दुर्भेद्यमरे र्हिं दुर्गम् त्रातुं स्वदेशं यततेऽमेयम्।।7।।

दशार्बुदा वा दशकोटिपूर्वा, संख्यास्मदीया महती जगत्याम्।
यथार्थशक्तिर्मनुजीयशक्तिः, संस्कारशिक्षालसिता यदि स्यात्।।8।।
गायन्तु गीतानि सगौरवानि, वदन्तु भव्या महनीयगाथाः।
बुधा मुदा राष्ट्रगुणान् स्तुवन्तु, तदैव देशस्य भवेद् विकासः।।9।।
अनन्तरत्नप्रसवाः समुद्राः, वसुन्धरा धान्यधनैः समृद्धा।
दिव्यौषधागारहिमालयश्च स्वस्थं बलिष्ठं कुरुते स्वदेशम्।।10।।
श्रुतिस्मृतिज्ञानमयो हि कोशो, विराजते देवगिरो ह्यतीतात्।
आसीद् गुरुर्यो जगतोऽखिलस्य, स ज्ञानदानेन चकास्ति देशः।।10।।
महार्हरत्नैर्भरिताऽस्य भूमिः, हिरण्यगर्भा जगति प्रसिद्धा।
सुवर्णरूपा चटकेयमुक्ता, सम्पत्तिहस्तैर्ह्वयतीव लोकान्।।12।।

– **पूर्वो उपाध्यक्षः**
**हरियाणा संस्कृत अकादमी**
**पंचकुला**

# सुकन्या

-डॉ० रामकिशोर मिश्रः

सुकन्या राज्ञः शर्यातेः सुन्दरी सुताऽऽसीत् । एकदा राजाऽऽखेटाय सिंहं हन्तुं वने गतस्तदा स स्वपुत्रीमपि सह निनाय। तत्र वने महर्षिच्यवनस्तपस्यासंलग्न आसीत्। राज्ञा सह गता सेना वने बहुत्पातमकरोत्। सा च्यवनस्य मृदावृते काये लोष्ठानक्षिपत्। सुकन्याऽपि तस्य नेत्रे कुशेनाऽऽन्दधत्। ततस्तदृषिकोपेन सेनायाः मतिर्भ्रष्टाऽभूत्। सैनिकाः परस्परं युद्धमारभन्त। राजाकुपितर्षि पार्श्वं गत्वा क्षमामयाचत्।

च्यवनर्षिणोक्तम्-राजन्! तव सैनिकक्षिप्तलोष्ठैर्मम शरीरं क्षतं विक्षतमभवत्। तव पुत्र्या कुशेन मे नेत्रेऽप्यन्धिते। अतो मम शरीर सेवायै स्वकन्यां मह्यं प्रदेहि। ततो राजा स्वसुतां तस्मै ददौ। सुकन्यापि तत्पत्नी भूत्वा तस्य सेवामारभत। वने भ्रमन्तौ तत्सौन्दर्यमवलोक्याऽश्विनीकुमारौ मोहितौ। ताभ्यां कथितम्-सुन्दरि! त्वमेनं वृद्धं त्यक्त्वाऽऽवयोरेकं स्वपतिं वृणीष्व, येन स्वजीवनसुखं यौवने सम्यक् प्राप्नुहि।

तयोर्वचनं श्रुत्वा सुकन्योवाच-प्रभो! यस्मै मां पिता दत्तवान्, तमहं न हास्यामि। तां पतिव्रतां ज्ञात्वा तौ देववैद्यौ प्रसन्नौ भूत्वा कथितवन्तौ-सुकन्ये! त्वमामलकीप्राशं स्वपतिं खादय, येन तव पतिर्युवा भवेत्। ततस्तौ तत्प्राशननिर्माणविधिं कथयामासतुः। सुकन्ये! त्वमुद्यानं गत्वा वृक्षेभ्य आमलकान् त्रोटय । उष्णजलेन तान् पक्त्वा स्वपतिं खादय, येन कतिपयदिनैस्ते पतिर्युवा भविष्यति।

सुकन्या तयोर्वचनानुसारं तत्सर्वमकरोत्। आमलकीप्राशं प्रति दिनं भक्षयित्वा च्यवनेन नवयौवनं प्राप्तम्। स आमलकीप्राशश्च्यवनप्राशनाम्ना प्रसिद्धोऽभवत्। तस्य प्राशस्य निर्मात्री सुकन्याऽऽसीदिति शम्।

- २९५/१४ पट्टीरामपुरम्
खेकड़ा ( बागवत )
उ० प्र०- २५०१०१

# कुरु योगम्

–ओम प्रकाश ठाकुरः

कुरु कुरु योगं प्रातर्बुद्ध्वा
रोगव्रातः सखे! कुतः
विज्ञजनैरुपदिष्टः सततम्
अनुभूतोऽयं योगपथः
स्वच्छे शुचौ च वातावरणे
मानसमेकाग्रं कृत्वा
आसनानि विधिना प्रकुर्वते
सप्राणायामं सुधियः
साधयते हितमेव जनानां
विधिना कृतयोगाभ्यासः
शनैः शनैरभ्येति जीवने
सोत्साहः कोऽप्युल्लासः
मनः प्रसादो देहलाघवम्
नवनवकार्ये सम्प्रीतिः
जायन्ते खलु योगाभ्यासात्
भवति निलीनाऽखिलभीतिः
जरा-जनित-कष्टान्यपहरते
योगविधिर्विधिनाऽऽचरितः
प्राणायामो योगासनमपि
किं किमद्भुतं नाचरतः

दुरितचयं योगोऽपाकुरुते
शान्तिं परमामानयते
मैत्रीभावं भजति च सर्वः
स्थितिर्यस्य नित्यं साम्ये
आधिव्याधी हरते योगः
धृतिर्जीवने समुदेति
लाभहानि चिन्त मतिक्रान्तो
नरः परं सुखमभ्येति
सर्वहितां ये योगसाधनाम्
अनुतिष्ठन्ति नरा नित्यम्
कान्त्या श्रिया च विलसन्तस्ते
भुवि विन्दन्ति परं सौख्यम्

–डी-७५७
**सरस्वती विहारः, नवदेहली**

# सत्सङ्गतिः किं न करोति पुंसाम्

-डॉ0 लता विगः

एकस्मिन् वने एकस्य सन्तस्य उटजः आसीत्। तस्मिन् वने एकं मधुरपययुक्तं एकं सरो आसीत्। प्रतिदिनम् अनेकेजनाः, देशान्तरेभ्यो राजानः तस्य सन्तस्य प्रवचनं श्रोतुम् आगच्छन्ति स्म। उपदेशश्रवणपश्चात् जनाः राजानः सन्ताय किञ्चिद् दातुम् ऐच्छन्, परं सः सन्तः किमपि वस्तु उपहारं स्वीकारं न करोति स्म। प्रतिदिनम् नवीन-विषयेषु स्व-उपदेशं यच्छति स्म। अधिकांशतः सः सन्तः पर्यावरणस्य विषये स्वविचारान् प्रस्तुतं करोति स्म। एकदा अकस्मात् अति वृष्टिः अभवत्। कोऽपि तस्य सन्तस्य प्रवचनं श्रोतुं नागतः। स सन्तः मौनं भूत्वा स्वयमेव पुस्तकं पठितुम् आरब्धवान्। तदैव एकः दस्युः स्व-अश्वेन सह सन्तस्य समीपे आगतः। परम् सन्तः पुस्तकपठने लीनः आसीत्। तेन दस्यूपस्थितिः न ज्ञाता। तदैव सः दस्युः क्रोधितः भूत्वा तमकथयत्-भो! तव ध्यानं कुत्र अस्ति? किं त्वम् मम विषये किञ्चिदपि न जानीषे? सर्वे माम् अवलोक्य दूरीभवन्ति। मातारः स्वशिशून् शयनकारयितुं मम् नाम शैतानसिंहः इत्यस्य प्रयोगं कुर्वन्ति। त्वम् अत्र किं करोषि? सन्तः उक्तवान्- 'अत्र जनाः मम उपदेशं श्रोतुम् आगच्छन्ति।' इति। एतत् श्रुत्वा सः शैतानसिंहः साट्टहासम् कथितवान् - 'त्वम् स्व-उपदेशेन कियत् अर्जितं करोषि ? तस्य वार्तां श्रुत्वा सन्तः प्रत्यवदत्-धनार्जनं मम् लक्ष्यः न अस्ति। जनाः सन्मार्गम् आश्रयेयुः इति मम् कामना। उपदेशप्रदानं सरलम् परम् तस्योपरि गमनं कठिनम् अस्ति। किम् त्वम् स्वोपदेशस्य पालनं करोषि? इति शैतानसिंह अकथयत् -अहम् त्वयि न विश्वासं न करोमि। अहम् तव वधं कर्तुमिच्छामि। किमपि कार्यं न करोषि। केवलम् अत्र स्थित्वा आनन्देन समयं यापयति। मरणाय तत्परः भव। अहम् बलवान् अस्मि। प्रत्येकं जनः मत् बिभेति। सन्तोऽवदत् सम्यक्। परम् मरणात् पूर्वं मम एका इच्छा अस्ति। दस्युः अवदत्- वद,

किमच्छिसि? सन्तः कथितवान्- अत्र समक्षे एकः आम्रवृक्षः अस्ति। तस्क एकां शाखां छित्वा अत्र आनय। एतत् श्रुत्वा दस्युः आम्रवृक्षस्य एकां शाखं छित्वा तस्य सन्तस्य समीपे आनीतवान्। सन्तः पुनः दस्युम् अवदत्- अधुना त्वम् पुनः इमाम् शाखां तेन वृक्षेण योजयतु। इति श्रुत्वा सः दस्युः तारस्वरेण हसितवान्। त्वया बहूनि पुस्तकानि पठितानि। परम् त्वया ज्ञानं न प्राप्तम्। त्वम् मूर्खः असि। छिन्ना शाखा पुनः वृक्षेण सह कथम्? योजनं भविष्यति, एतत् श्रुत्वा सन्तः तम् अवदत्- इयम् मम इच्छा अस्ति पूर्णः करणीयम्, पूर्णम् कथम् भवेत्। एतत् न सम्भवम् इति दस्युः अवदत् । पुनः सन्तः उक्तवान्- यथा छिन्ना शाखा पुनः वृक्षेण सह योजनं भवितुं न शक्नोति। एवमेव यः मानवः त्वया छिन्नः कृतः, किम् त्वम् तम् पुनः जीवितुं कर्तुं शक्नोति ? वदतु। इति श्रुत्वा दस्युः अविचारयत्- मया तु अनेके जनाः मारिताः छिन्नाः'' इति। सः लज्जितोऽभवत्। अश्रूणि प्रवाहमाणः सः सन्तस्य चरणयोः अपतत्। क्षमस्व, क्षमस्व मया बहु-अपराधः कृतः। अहम् दण्डनीयः। सन्तः तस्य आलिङ्गनं करोति। तस्मात् दिनात् सः दस्युः पूर्णं जीवनं परोपकाराय अर्पितम् अकरोत्। अतः मानवेन सर्वदैव सत्सङ्गतिः करणीयाः।

**- संस्कृत अध्यापिका**

**डी0 ए0 वी0 सैन्टेनरी पब्लिक विद्यालयः,**

**पश्चिम-एन्क्लेवः, नव देहली**

# ( चिट्ठी आई है ) संस्कृतगीतम्

-प्रीति सिंहः

पत्रम् आगतम्-आगतं पत्रम् आगतम्.................
पत्रम् आगतं देशात् पत्रम् आगतम्...................
बहुदिनानां पश्चात्, अस्मान् वे-वतनान्संस्मरणम्........
देशस्य मृत्तिका आगता..............................
पत्रम् आगतम्....................................

उपरि मे नाम लिखितम् अन्तः इदं संदेशं लिखितम्
ओ परदेशं गम्यमानः, पुनः गृहं न आगम्यमानः
सप्तसमुद्रं दूरे गतः त्वम्, अस्मान् जीवितंमारगतः त्वं
रुधिर सम्बन्धः त्रोटयगतः त्वं,
नयने अश्रु विहाय गतः त्वम्
स्वल्पं खादामः स्वल्पं शयेमः, बहु अधिकं वयं रुद्मः.......
पत्रम् आगतम्.....................................................

एकान्तः अभवन् नगरस्य वीथयः,
अप्रियः अभवन् वनिकायाः पल्लवाः
वदन्तः सन्ति श्रावणस्य दोलाः,
विस्मृतः त्वं वयं नैव विस्मृतः,
त्वन्तः विना यदा आगता होली,
पिचकारीतः प्रगटी गोली,
पिप्पलः शून्यं, जलस्थलं शून्यम्,
गृहशमशानस्यऽभवद्दृश्यम्,
अन्नं कर्तितम् आगता वैशाखी,

तवागमनऽभवद् अवशिष्टम्
पत्रम् आगतम्..........................
पूर्व यदा त्वं पत्रं लिखति स्म,
कर्गदे मुखं दृश्यते स्म,
पिहितमेतद् खेलमपि अधुना,
पिहितमेतद् मेलमपि अधुना,
पीनसे यदा उपविष्टा भगिनी,
मार्गम् अपश्यन् आसन् नयने,
अंह तु जनकः किमस्ति मे,
तव मातुः स्थितिः दयनीयः,
त्वत्तः पत्नी करोति सेवा,
मुखेन प्रतिभाति दीना,
त्वया धनं बहुसंकलितं,
एतत् धनमेव देशनिवारितम्
देशपराणां त्यक्त्वा आगच्छ,
खगः पिञ्जरः त्रोटय आगच्छ,
आगच्छ वयः अस्ति अति स्वल्पं,
अस्मद् गेहेऽपि अस्ति रोटिका
पत्रम् आगतम्.......................
देशात्पत्रम् आगतम्.....................

**- आर.जेड.सी-१६८ ए,**
**गली न.-३, मधु विहारः**
**नव देहली -५९**

# बुभुक्षितः काकः

-डॉ0 हर्षदेवमाधवः

एकः काकः आसीत् । तस्य नाम चतुरः। स एकदा बुभुक्षितः अभवत्। स माया-अम्बायाः गृहम् अगच्छत्। चतुरः वातायने उपाविशत्।

गृहे स माया-अम्बाम् अपश्यत्। काकः अवदत्, ''अम्ब, अम्ब! सुप्रभातम्!'' माया-अम्बाम् अवदत्- ''पुत्रक! सुप्रभातम्, किम् इच्छसि ?

चतुरः अवदत्- 'अम्ब! बुभुक्षा मां बाधते। रोटिकां देहि।'

माया-अम्बा अहसत्।

सा अवदत्- ''पुत्रक! अहं रोटिकां दातुम् इच्छामि, किन्तु रोटिका गोधूमचूर्णेन भवति। गोधूमचूर्णं गृहे नास्ति। त्वं आपणात् गोधूमचूर्णम् आनय।'' चतुरः अवदत्, 'बाढम्, अहं गच्छामि।' काकः विपणीम् अगच्छत्। तत्र घरट्टस्य आपणः आसीत्। तत्र कुबेरः आपणिकः आसीत्। चतुरः कुबेरम् अवदत्-

''पितृव्य! सुप्रभातम्।''

कुबेरः अवदत्-

'' सुप्रभातम् पुत्रक! वद, किम् इच्छसि ?''

चतुरः अवदत्-

''पितृव्य! गोधूमचूर्णं देहि।''

कुबेरः अवदत्-

''पुत्रक! गोधूमचूर्णेन किं करिष्यसि ?''

चतुरः अवदत्-

''पितृव्य ! गोधूमचूर्णम् अहं माया-अम्बायै दास्यामि। सा मह्यं रोटिकां दास्यति।'' कुबेरः अवदत्- ''पुत्रक! अहं गोधूमचूर्णं दातुम् इच्छामि किन्तु गोधूमाः न सन्ति। त्वं केदाराकृषीवलस्य गृहं गच्छ, गोधूमान् आनय।'' चतुरः अवदत्- ''बाढम्, अहं गच्छामि।'' चतुरकाकः केदारस्य गृहम् अगच्छत्। केदारः हलेन सह गृहात् बहिः अतिष्ठत्।

चतुरः अवदत्- ''केदारपितृव्य, सुप्रभातम्।''

केदारः अवदत्- ''पुत्रक! सुप्रभातम्, किम् इच्छसि ?''

चतुरः अवदत्- ''पितृव्य! गोधूमान् देहि।''

केदारः अपृच्छत् - ''गोधूमैः किं करिष्यसि ?''

चतुरः अवदत्- '' पितृव्य! त्वं गोधूमान् दास्यसि। अहं गोधूमान् कुबेरपितृव्याय दास्यामि । स मह्यं गोधूमचूर्णं दास्यति। अहं गोधूमचूर्णं माया-अम्बायै दास्यामि।'' सा मह्यं रोटिकां दास्यति। अहं खदिष्यामि।

केदारः अहसत्- ''पुत्रक! अंह गोधूमान् दातुम् इच्छामि, किन्तु गोधूमाः न सन्ति। गोधुमान् मह्यं क्षेत्रं दास्यति तदा अहं तुभ्यं दास्यामि । क्षेत्रं गत्वा गोधूमान् आनय।

चतुरः अवदत्- 'बाढम्, अहं क्षेत्रं गच्छामि।'

चतुरः केदारस्य क्षेत्रम् अगच्छत्।

सः अवदत्- 'क्षेत्रभ्रातः, गोधूमान् देहि।'

क्षेत्रम् अवदत्- 'भ्रातः गोधूमैः किं करिष्यसि ?'

चतुरः अवदत्- 'अहं गोधूमान् केदारपितृव्याय दास्यामि। स मह्यं दास्याति। तदा अहं कुबेरपितृव्याय दास्यामि। स मह्यं गोधूम्चूर्णं दास्यति। अहं गोधुमचूर्णं माया-अम्बायै दास्यामि। सा मह्यं रोटिकां दास्यति। अहं रोटिकां खादिष्यामि।'

क्षेत्रम् अहसत्- 'भ्रातः, अहं गोधूमान् दातुम् इच्छामि किन्तु यदा मेघः वर्षति तदा गोधूमाः भवन्ति। त्वं मेघं वद।'

चतुरः अवदत्- ''बाढम्''। चतुरः एकं जलदम् अपश्यत्। स गगने आसीत्। चतुरः वृक्षाग्रम् अगच्छत्।

चतुरः उच्चैः अवदत्- हे मेघराज! प्रणमामि।

जलदः अवदत्- ''शुभम् अस्तु। वद, किम् इच्छसि ?''

चतुरः अवदत्- हे मेघराज! त्वं केदारपितृव्यस्य क्षेत्रे वर्ष।

जलदः अपृच्छत्- कस्माद् ?

चतुरः अवदत्- ''त्वं केदारपितृव्यस्य क्षेत्राय जलं दास्यसि। क्षेत्रं केदारपितृव्यः मह्यं गोधूमान् दास्यति। केदारपितृव्यः मह्यं गोधूमान् दास्यति। दास्यामि स मह्यं गोधूमचूर्णं दास्यति। अहं गोधूमचूर्ण माया अम्बायै दास्यामि। सा मह्यं रोटिकां दास्यति। अहं रोटिकां खादिष्यामि।''

जलदः अहसत्। सः अवदत्- 'पुत्रक! अहं जलं दातुम् इच्छामि, किन्तु अधुना मम समीपे जलं नास्ति। अतः अहं श्वेतवर्णः । यदा सागरः जलं ददाति तदा अहं वर्षामि,

त्वं समुद्रं वद।'

चतुरः अवदत्- बाढम्। चतुरः गगने उड्डयति। स समुद्रस्य समीपे अगच्छत्।

सः सागरं समुद्रम् अवदत्-

''हे सागरदेव! प्रणमामि।''

सागरः अवदत्- ''पुत्रक! चिरं जीव! वद, किम् इच्छसि ?'' चतुरः अवदत्- '' हे सागरदेव! जलदाय जलं देहि।''

सागरः अपृच्छत्- कस्मात् ?

चतुरः अवदत्- 'हे सागरदेव! त्वं जलदाय जलं दास्यति। जलदः क्षेत्राय जलं दास्यति। क्षेत्रं केदारपितृव्यं गोधूमान् दास्यति। स मह्यं गोधूमान् दास्यति। अहं गोधूमान् कुबेरपितृव्याय दास्यामि। कुबेरपितृव्यः मह्यं गोधूमचूर्णं दास्यति। अहं गोधूमचूर्णं माया-अम्बायै दास्यामि। सा मह्यं रेटिकां दास्यति। अहं रोटिकां खादिष्यामि।' सागरः अहसत्- पुत्रक! अहं जलं दातुम् इच्छामि किन्तु यदा सूर्यः मम जलं शोषयति तदा जलदः जलं लभते। अतः त्वं सूर्यपितामहं वद।

चतुरः अवदत्- ''बाढम्।'' चतुरः नदीतीरम् अगच्छत्। जलं गृहीत्वा अर्घ्यं दत्त्वा चतुरः सूर्यम् अवदत्- '' हे सूर्यपितामह! प्रणमामि।'' सूर्यपितामहः, नदीजले दर्शनं दत्त्वा अपृच्छत्- ''पुत्रक! चिरं जीव। वद, किम् इच्छसि?''

चतुरः अवदत्- ''पितामह! समुद्रात् जलं शोषय।''

सूर्यपितामहः अपृच्छत्- 'कस्मात् ?' चतुरः अवदत्- 'पितामह! त्वं सागरात् जलं शोषय। त्वं जलं जलदाय दास्यसि, जलदः जलं क्षेत्राय दास्यति। क्षेत्रं गोधूमान् दास्यति। अहं गोधूमान् केदारपितृव्याय दास्यामि। स मह्यं गोधूमान् दास्यति। अहं गोधूमान् कुबेरपितृव्याय दास्यामि। स मह्यं गोधूमचूर्णं दास्यति। अहं गोधूमचूर्णं माया-अम्बायै दास्यामि। सा मह्यं रोटिकां दास्यति। अहं रोटिकां खादिष्यामि।'

सूर्यपितामहः अहसत्- 'पुत्रक! अहं जलदाय जलं दातुम् इच्छामि किन्तु अहं निदाघे जलं शोषयामि। अधुना तु शीतकालः वर्तते। अतः अहं जलं शोषयितुं न समर्थः। शुभं भवतु।'

चतुरः दुःखितः अभवत्। तदा सूर्यपितामहः अहसत्। सः अवदत्: 'पुत्रक! दुःखितः मा भव। त्वं-माया-अम्बायाः गृहं गच्छ। अहं तां पश्यामि।'

चतुरः अपृच्छत्–'पितामह! माया-अम्बायाः गृहं दूरे वर्तते। अहं न पश्यामि'।
सूर्यपितामहः पुनरपि अहसत्।
सः अवदत्, 'पुत्रक! अहं समग्रं विश्वं पश्यामि। तवं माया-अम्बायाः गृहं गच्छ। सा तुभ्यं रोटिकां दास्यति।' चतुरः पुनरपि माया-अम्बायाः गृहम् आगच्छत्। तदा तस्याः पुत्रः किरातः शालां गन्तुं बहिः आगच्छत्।
माया-अम्बा चतुरम् अपश्यत्।
सा विहस्य अवदत्– "पुत्रक! त्वं बुभुक्षितः। अहं तु परिहासं कृतवती। गृहे गोधूमचूर्णम् अस्ति एव। अधुना मया रोटिकाः पाचिताः। एका रोटिका गौरीधेनोः, एका रोटिका किरातस्य एका रोटिका किरातस्य पितुः, एका रोटिका तव, एका रोटिका मम त्वमपि तव रोटिका गृहाण।" चतुरः रोटिकां नीत्वा वृक्षम् अगच्छत्।

अधुना चतुरः वृक्षे स्वकुलाये रोटिकां खादति। गौरीधेनुः वृक्षतले रोटिकां खादति। किरातः रोटिकां खादित्वा शालां गच्छति। माया-अम्बा स्वगृहे रोटिकां खादति। सर्वे सुखिनः सन्ति।

**– ८, राजतिलक बंग्लोज, आबादनगरम्,**
**अमदाबाद-३८००५८**

# अग्नि

–डॉ० गदाधरः त्रिपाठी

सृष्टेरादिशब्दस्त्वग्निरेव हि स्वीकृतः।
तेनैव ऋग्वेदे चाग्निमीडे पुरोहितम्।।
अग्निरेव च ऊर्जाया आदिस्रोतश्च स्वीकृतः।
व्याप्तोऽयं सर्वक्षेत्रेषु प्रकाशकोऽपि च सर्वदा।।
सृष्टौ पञ्चभूता येऽग्निस्तेषु समन्वितः।
अग्निना पच्यते सर्वं सृष्टिश्चलति सर्वदा।।
सर्वेभ्यश्च देवेभ्यो हि कार्यमेकं सुनिश्चितम्।
अग्निदेवस्त्वेको वै प्रकाशकः पाचकस्तथा।
वडवानलो हि व्यप्तोऽस्ति सागरे वै चोर्मिषु।
जठरानलश्च च उदरे पाचकः स्वास्थ्यवर्धकः।।
यज्ञाद् भवन्ति पर्जन्यः पर्जन्यादन्नसंभवः।
अग्निं विना न यज्ञस्य हि कल्पना भवति कदाचन।।
हुतं प्राप्नुवन्ति देवा वा अग्निर्वहति सर्वदा।
सुरक्षितमस्ति देवानां देवत्वं सर्वथा हि वै।।
प्रकाशकैश्च किरणैश्चोर्ध्वं गच्छति सर्वदा।
तेजस्विनाञ्च गमनं ह्योर्ध्वं भवति निश्चितम्।।
शास्त्रेषु त्रिविधोऽग्निर्वर्णितः विद्वद्भिस्तदा।
गृहेषु स्थापनीयो हि कल्याणप्राप्तये सदा।
स्वाहाग्नेः पत्नी खलु भारतनाम्ना प्रतिष्ठितः।
त्रयो पुत्रा अभवन् वै प्रचलिताग्नेः परम्परा।।

## धनुः

प्रचलित आदिकालादेव प्रयोगो धनुषश्च वै।
महत्त्वं स्वीकृतमस्ति आखेटाय रक्षणाय च हि।।

संहितासु ब्राह्मणग्रन्थेषु इन्द्रस्य महिमा महान्।
वज्रेण सह धनुषस्तस्य उल्लेक्षोऽभवत्तदा।।
वेदवांङ्मये चैव धनुर्वेदो हि विश्रुतः।
द्वादशसु मुक्तास्त्रेषु धनुरेकं महद् हि वै।।
अल्पव्ययेन धनुषश्च निर्माणं भवति च वै।
प्रक्षेपणं शराणाञ्च शीघ्रं भवति सर्वदा।।
लक्ष्यं दूरतमं यच्च वेधितं भवति हि सर्वदा।
तृणसमूहैः स्नायुतन्त्रैश्च प्रत्यञ्चा निर्मीयते।।
अस्थिभिर्वंशदण्डैश्च निर्माणं धनुषश्च वै।
पिनाकं शिवस्यासीद् गाण्डीवमर्जुनस्य च हि।।
कोदण्डं रामस्यासीद् धनुर्धारीति कथ्यते।
कृष्णेन वै धृतं सारङ्ग विशिष्टो युद्धकेषु हि।।

**– रीडर संस्कृत विभागः**
**श्री अग्रसेन स्नातकोत्तर महाविद्यालयः**
**मऊरानीपुर, झाँसी ( उ० प्र० )**

# "चरैवेति-चरैवेति"

**अनुवादकः-शुकदेवः शर्मा**

एकदा रात्रौ ' सुलतान-महमूदः' अश्वमारुह्य भ्रमणार्थं एकाक्येव नगरान्निर्जगाम। सोऽद्राक्षीत् पथि यदेकोऽतिवृद्धः शिरोऽवनम्य सुवर्णस्य कणान् अवाप्तुं सिकतां (रेत को) पुनानः (छनना) अस्थात्। सिकतां पुनानेन अनेन सिकतायाः पर्वताकारं स्तोमं (ढेर) अकारि। दत्तचेतसा तत्कार्यरतं तं वृद्धमीक्षमाणः सुलतानः क्षणं यावत् तत्रैव असित्। क्षणानन्तरं चासौ सिकतायाः समुच्चये (स्तोमे) रत्नखचितं स्वर्णनिर्मितञ्च स्वकीयं कङ्कणं निक्षिप्य वायुवेगेन तिरोहितोऽभूत्।

अग्रिमायां रात्रौ 'सुलतानः' पुनस्तथैव तमादेव मार्गान्निरगात् अद्राक्षीच्चासौ तमेव वृद्धं यत्स स एव वृद्धः इदानीमपि सिकतां पुनानः तथैव व्यस्त आसीत्। विस्मयाक्रान्तः सुलतानोऽवादीत्, "सौम्य! गतरात्रौ यत्त्वया अत्र स्तोमे अतिबहुमूल्यं कङ्कणं लब्धं तत्खलु सर्वामपि पृथिवीं क्रेतुं पर्याप्तम्। तस्मिन् लब्धेऽपि त्वमतिश्रमकरं सिकतायाः पुनानकार्यं न त्यजसि ?"

निजश्वासान् संयोज्यासौ वृद्धः उत्तरितवान्, "श्रीमन् ? गतरात्रौ सत्यमेव ईदृग् अपूर्वं वस्तु प्राप्तम्। तस्मादेव यावज्जीवनं अन्वेषणं (खोज) करणीयमस्ति। इतोऽपि अपूर्वं किञ्चित् हस्तगतं स्यान्नाम ?"

बालाः? सततप्रयत्नशीलं एनमेव वृद्धं स्वीयमादर्शं मन्यमानाः यूयमपि सततं अन्वेषणपराः स्युः यावत् सफलताया स्वोद्देश्यस्य वा द्वारं अनावृतं (खुलना) न स्यात्। तस्मादेवाहं ब्रवीमि यत्स्वोद्देश्यस्य प्राप्तये यावज्जीवं वेदोक्तं - "चरैवेति चरैवेति" (चलते चलो बढ़ते चलो) -मार्गमनुसरणीयम्।

**-पूर्वाचार्यः अध्यक्षश्चः,**
**संस्कृत, पालि, प्राकृत-विभाग,**
**गुरूनानक देव वि.वि., अमृतसर।**

# आचार्यजयन्ती

- श्री प्रशांतः वर्मन्

अनिकेतो हरिश्चन्द्रः, दीपङ्करो रिपुञ्जयः।
सायन्तनी महामाया, सेमन्ती दीपिका तथा॥1॥
एते विद्यार्थिनस्त्वष्ट, गुरुभक्त्या परिप्लुताः।
समागच्छन्ति सम्मिल्य, श्रीगुरोः पावनाश्रमे॥2॥
शुभाविर्भावघस्रोऽद्य, विद्यागुरोर्महात्मनः।
स्वार्थदुष्टे महानादे, भयानके धरातले॥3॥
गुरोर्जन्मजयन्तीयम्, विद्यार्थिनां महोत्सवः।
भक्त्यनुरागभूयिष्ठः, श्रद्धया परिपूरितः॥4॥
पत्रैः पुष्पैः ध्वजैः सुष्ठु, विद्याश्रमो विमण्ड्यते।
सङ्गीतैः भाषणैः नृत्यैः, श्रीगुरुः अभिनन्द्यते॥5॥
काष्ठासने समासीनः, विद्याचार्यो महामतिः।
तुष्टचित्तः प्रशान्तास्यः, शिष्यवर्गं निरीक्षते॥6
पुष्पराशिः पुरोभागे, पीतधवललोहितः।
ज्वलति वर्तिका धूपः, परिवेशश्च सात्त्विकः॥7॥
गोस्वामितुलसीबद्धम्, रामचरितमानसम्।
समर्पयन्ति सर्वे च, प्राचार्यस्य करोत्पले॥8॥
विद्यार्थिनो नतस्कन्धाः, युक्तकराः समाहिताः।
प्रणमन्ति महाचार्यम्, तापसं ब्रह्मचारिणम्॥9॥

**अनिकेतो ब्रवीति-**

आचार्य काम्यतेऽस्माभिः, स्वास्थ्यं शान्तिस्तवाक्षया।
बहतु ते सदास्मासु, स्नेहगङ्गा निरत्यया॥10

**सायन्तनी ब्रवीति-**

आचार्य तव सान्निध्यात्, सौभाग्याब्धौ प्लवामहे।

उपदेशस्तवायत्याम्, प्रदर्शयतु पद्धतिम्।।11।।
अथासनात् कृतोत्थानः, धर्मशीलो महाबुधः।
छात्रधनो हिताकाङ्क्षी, मेघनादे: प्रभाषते।।12।।

**आचार्यो ब्रवीति-**

अनिकेत हरिश्चन्द्र, दीपङ्कर रिपुञ्जय।
सायन्तनि महामाये, सेमन्ति दीपिके च भोः।।13।।
बहुयोनिप्रवेशान्ते, नृकुले जन्म लभ्यते।
एतज्जन्म महामूल्यम्, गुरुत्वमस्य चिन्त्यताम्।।14।।
शास्त्रानुशीलनं कार्यम्,श्रद्धया मुक्तचेतसा।
नव्यविज्ञानसिद्धान्तः, वेद्यः सोऽपि समासतः।।5।।
भारतसंस्कृतिः पूज्या, परम्पराप्रवाहिता।
नवयुगः समभ्येतु, युष्मान् सर्वान् कृतश्रमान्।।16।।
सर्वेषामस्तु साफल्यम्, स्वेषु धर्म्येषु कर्मसु।
आप्नुयाद् विस्तृतिं दृष्टिः स्वास्थ्यं भूयाद् निरामयम्।।17।।

**- देशप्रियपल्ली, पो० कलियागञ्जः,**
**उत्तर दिनाजपुरम्**
**पश्चिमवङ्गप्रदेशः**

# कौशल-प्राप्तिः

– अंजु बाला

एकदा कौरवाः पाण्डवाश्च बाल्ये मिलित्वा क्रीडन्ति स्म। ते सर्वे समीपस्थे वने क्रीडितुं अगच्छन्। तत्र ते अनेकविधाः क्रीडाः क्रीडन्तः आसन्। तदैव दुर्योधनः भीमसेनं प्रति वेगेन कन्दुकम् अक्षिपत्। कन्दुकः प्रहारात् आत्मानं रक्षितुं भीमसेनः झटिति तत्रैव उपाविशत्। किन्तु कन्दुकः दूरस्थे एकस्मिन् कूपेऽपतत्। कूपः निर्जलः आसीत् तथापि कूपे अवतरणं बलानां कृते सुकरं तु नैव आसीत्। ते सर्वे चिन्ताकुलाः जाताः। अपि च कन्दुकः प्राप्त्यर्थं तत्रैव उपाविशन्।

अत्रान्तरे कश्चित् धनुर्धरः ब्राह्मणः तत्रागच्छत्। सः कूपं परितः चिन्ताकुलान् बालकान् दृष्ट्वा अपृच्छत्-"यो बालाः। के यूयम् ? अत्र कूपं परितः किमर्थं तिष्ठथ।"

प्रश्नं श्रुत्वा तेषु पाण्डवाग्रजो युधिष्ठिरः विनयेनावदत्- भगवन्। पाण्डुपुत्रः युधिष्ठिरोऽहम्। एते सर्वे मम भ्रातरः । अस्माकं कन्दुकः कूपेऽपतत्। कूपोऽयं निर्जलोऽपि ततः कन्दुकस्य निष्कासनः न सरलः।"

एतच्छुत्वा बाह्मणोऽवदत्- अलं चिन्तया। अहं युष्माकं कन्दुक-निष्कासने सहायकोऽस्मि। यूयं कांश्चित् शरकाण्डान् आनयत।"

एतेन मुदिताः सर्वे बालकाः झटिति शरकाण्डान् आनीतवन्तः। गुरुः द्रोणाचार्यः एकं शरकाण्डं धनुषि निधाय कुन्दकेऽक्षिपत्। ततः द्वितीयं तृतीयं.......। एवं दशपर्यन्तं शरकाण्डान् एकस्योपरि निक्षिप्य तेषां माला अरचयत्। अन्ते कन्दुकम् उपरि आकर्षत्। एतं विलक्षण कौतुकम् उपायं च विलोक्य बालकाः विस्मिता अभवन् अपृच्छञ्च 'एतत् कथं सम्भवम्'?

ततः गुरुः द्रोणाचार्य उक्तवान्- एकाग्रमनसा स्थिरचित्तेन सतत अभ्यासेन एतत् कौशलं सम्भवम् अस्ति।

– भारतीय विद्या भवनम्
मेहता विद्यालयः, के. जी. मार्गः
नव देहली

# संस्कृतमाहात्म्यम्

– हरीशचन्द्रकुकरेती

संस्कृतभाषा मधुरा भाषा अस्माकं हि जीवनम्।
कार्यं कुर्मः संस्कृताय इदमेव नो लक्ष्यम्।।

वेदादीनां ज्ञानं यस्यां तादृग्भाषा संस्कृतम्।
भारतसंस्कृती राजते यस्यां तादृग्वाणी संस्कृतम्।।
कार्यं कुर्मः संस्कृतम.................................... लक्ष्यम्।।

व्यासभासकालिदासैर्भाषितभाषा संस्कृतम्।
विद्वांसो हि निमग्ना यस्यां तादृग्वाणी संस्कृतम्।।
कार्यं कुर्मः संस्कृतम.................................... लक्ष्यम्।।

बह्व्यो भाषा देशेऽस्माकं जननी तासां संस्कृतम्।
माता पूज्या देववाणी मधुरा भाषा संस्कृतम्।।
कार्यं कुर्मः संस्कृतम.................................... लक्ष्यम्।।

गौरवदायिनी दुःखहारिणी सुरभाषा हि संस्कृतम्।
पूजनीया अध्येतव्या सरसा भाषा संस्कृतम्।।

RNI No.
DELSAN/2013/50379

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी के
स्वाामित्व द्वारा मै. एस.डी.एम. प्रिन्टर एण्ड पैकर,
हरिनगर, घण्टा घर, नई दिल्ली-64
से मुद्रित और दिल्ली संस्कृत अकादमी, प्लाट सं.-5,
झण्डेवालान, करोलबाग, नई दिल्ली-110005 से प्रकाशित।